श्रीः

# ॥ श्रीविष्णुसहस्रनामस्तोत्रम् ॥

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये॥ १ ॥

यस्य द्विरदवक्त्राद्याः पारिषद्याः परश्शतम्।
विघ्नं निघ्नन्ति सततं विष्वक्सेनं तमाश्रये॥ २ ॥

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम्।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम्॥ ३ ॥

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः॥ ४ ॥

अविकाराय शुद्धाय नित्याय परमात्मने।
सदैकरूपरूपाय विष्णवे सर्वजिष्णवे॥ ५ ॥

यस्य स्मरण मात्रेण जन्मसंसारबन्धनात्।
विमुच्यते नमस्तस्मै विष्णवे प्रभविष्णवे॥ ६ ॥
ओं नमो विष्णवे प्रभविष्णवे॥

*श्रीवैशम्पायन उवाच* ———
श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत॥ १ ॥

*युधिष्ठिर उवाच* ———
किमेकं दैवतं लोके किं वाऽप्येकं परायणम्।
स्तुवन्तः कं कमर्चन्तः प्राप्नुयुर्मानवाः शुभम्॥ २ ॥

को धर्मः सर्वधर्माणां भवतः परमो मतः।
किं जपन् मुच्यते जन्तुर्जन्मसंसारबन्धनात्॥ ३ ॥

*श्रीभीष्म उवाच* ———

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम्।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः॥ ४॥

तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम्।
ध्यायन् स्तुवन्नमस्यंश्च यजमानस्तमेव च॥ ५॥

अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम्।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत्॥ ६॥

ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम्।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम्॥ ७॥

एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा॥ ८॥

परमं यो महत्तेजः परमं यो महत्तपः।
परमं यो महद्ब्रह्म परमं यः परायणम्॥ ९॥

पवित्राणां पवित्रं यो मङ्गळानां च मङ्गळम्।
दैवतं देवतानां च भूतानां योऽव्ययः पिता॥ १०॥

यतः सर्वाणि भूतानि भवन्त्यादियुगागमे।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये॥ ११॥

तस्य लोकप्रधानस्य जगन्नाथस्य भूपते।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम्॥ १२॥

यानि नामानि गौणानि विख्यातानि महात्मनः।
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये॥ १३॥

ऋषिर्नामसहस्रस्य वेदव्यासो महा मुनिः।
छन्दोऽनुष्टुप् तथा देवो भगवान् देवकीसुतः॥

अमृतांशूद्भवो बीजं शक्तिर्देवकिनन्दनः।
त्रिसामा हृदयं तस्य शान्त्यर्थे विनियुज्यते॥

विष्णुं जिष्णुं महाविष्णुं प्रभविष्णुं महेश्वरम्।
अनेकरूपदैत्यान्तं नमामि पुरुषोत्तमम्॥

अस्य श्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमहामन्त्रस्य। श्रीवेदव्यासो भगवान् ऋषिः। अनुष्टुप् छन्दः। श्रीमहाविष्णुः परमात्मा श्रीमन्नारायणो देवता। अमृतांशूद्भवो भानुरिति बीजम्। देवकीनन्दनः स्रष्टेति शक्तिः। उद्भवः क्षोभणो देव इति परमो मन्त्रः। शङ्खभृन्नन्दकी चक्रीति कीलकम्। शार्ङ्गधन्वा गदाधर इत्यस्त्रम्। रथाङ्गपाणिरक्षोभ्य इति नेत्रम्। त्रिसामा सामगः सामेति कवचम्। आनन्दं परब्रह्मेति योनिः। ऋतुः सुदर्शनः काल इति दिग्बन्धः। श्रीविश्वरूप इति ध्यानम्। श्रीमहाविष्णु प्रीत्यर्थे श्रीसहस्रनाम जपे विनियोगः।

## *ध्यानम्*

क्षीरोदन्वत्प्रदेशे शुचिमणिविलसत्सैकते मौक्तिकानां
मालाक्लृप्तासनस्थः स्फटिकमणिनिभैर्मौक्तिकैर्मण्डिताङ्गः।
शुभ्रैरभ्रै रदभ्रैरुपरि विरचितैर्मुक्तपीयूषवर्षैः
आनन्दी नः पुनीयादरिनलिनगदाशङ्खपाणिर्मुकुन्दः॥

भूः पादौ यस्य नाभिर्वियदसुरनिलश्चन्द्रसूर्यौ च नेत्रे
कर्णावाशाः शिरो द्यौर्मुखमपि दहनो यस्य वास्तेयमब्धिः।
अन्तःस्थं यस्य विश्वं सुरनरखगगोभोगिगन्धर्वदैत्यैः
चित्रं रंरम्यते तं त्रिभुवनवपुषं विष्णुमीशं नमामि॥

ओं नमो भगवते वासुदेवाय।

शान्ताकारं भुजगशयनं पद्मनाभं सुरेशं
विश्वाधारं गगनसदृशं मेघवर्णं शुभाङ्गम्।
लक्ष्मीकान्तं कमलनयनं योगिहृद्ध्यानगम्यं
वन्दे विष्णुं भवभयहरं सर्वलोकैकनाथम्॥

मेघश्यामं पीतकौशेयवासं
श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम्।
पुण्योपेतं पुण्डरीकायताक्षं
विष्णुं वन्दे सर्वलोकैकनाथम्॥

नमः समस्तभूतानामादिभूताय भूभृते।
अनेकरूपरूपाय विष्णवे प्रभविष्णवे॥

सशङ्खचक्रं सकिरीटकुण्डलं सपीतवस्त्रं सरसीरुहेक्षणम्।
सहारवक्षःस्थलशोभिकौस्तुभं नमामि विष्णुं शिरसा चतुर्भुजम्॥

छायायां पारिजातस्य हेमसिंहासनोपरि।
आसीनमम्बुदश्याममायताक्षमलङ्कृतम्॥

चन्द्राननं चतुर्बाहुं श्रीवत्साङ्कितवक्षसम्।
रुक्मिणीसत्यभामाभ्यां सहितं कृष्णमाश्रये॥

*॥ नामसहस्रप्रारम्भः ॥*

ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः।
भूतकृद् भूतभृद्भावो भूतात्मा भूतभावनः॥ १॥

पूतात्मा परमात्मा च मुक्तानां परमा गतिः।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च॥ २॥

योगो योगविदां नेता प्रधानपुरुषेश्वरः।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः॥ ३॥

सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः।
संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः॥ ४॥

स्वयंभूः शम्भुरादित्यः पुष्कराक्षो महास्वनः।
अनादिनिधनो धाता विधाता धातुरुत्तमः॥ ५॥

अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः॥ ६॥

अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः।
प्रभूत स्त्रिककुद्धाम पवित्रं मङ्गळं परम्॥ ७॥

ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः।
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः॥ ८॥

ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः।
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान्॥ ९॥

सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः।
अहस्संवत्सरो व्याळः प्रत्ययः सर्वदर्शनः॥ १०॥

अजस्सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः।
वृषाकपिरमेयात्मा सर्वयोगविनिस्सृतः॥ ११॥

वसुर्वसुमनास्सत्यस्समात्मा सम्मितस्समः।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः॥ १२॥

रुद्रो बहुशिरा बभ्रुर्विश्वयोनिश्शुचिश्रवाः।
अमृतश्शाश्वतः स्थाणुर्वरारोहो महातपाः॥ १३॥

सर्वगः सर्वविद्भानुः विष्वक्सेनो जनार्दनः।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः॥ १४॥

लोकाध्यक्षस्सुराध्यक्षो धर्माध्यक्षः कृताकृतः।
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः॥ १५॥

भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः।
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः॥ १६॥

उपेन्द्रो वामनः प्रांशुः अमोघः शुचिरूर्जितः।
अतीन्द्रस्सङ्ग्रहस्सर्गो धृतात्मा नियमो यमः॥ १७॥

वेद्यो वैद्यः सदायोगी वीरहा माधवो मधुः।
अतीन्द्रियो महामायो महोत्साहो महाबलः॥ १८ ॥

महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः।
अनिर्देश्यवपुः श्रीमान् अमेयात्मा महाद्रिधृत्॥ १९ ॥

महेष्वासो महीभर्ता श्रीनिवासस्सतां गतिः।
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः॥ २० ॥

मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः।
हिरण्यनाभस्सुतपाः पद्मनाभः प्रजापतिः॥ २१ ॥

अमृत्युस्सर्वदृक् सिंहः सन्धाता सन्धिमान् स्थिरः।
अजो दुर्मर्षणश्शास्ता विश्रुतात्मा सुरारिहा॥ २२ ॥

गुरुर्गुरुतमो धाम सत्यस्सत्यपराक्रमः।
निमिषोऽनिमिषस्स्रग्वी वाचस्पतिरुदारधीः॥ २३ ॥

अग्रणीर्ग्रामणीः श्रीमान् न्यायो नेता समीरणः।
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात्॥ २४ ॥

आवर्तनो निवृत्तात्मा संवृतस्संप्रमर्दनः।
अहस्संवर्तको वह्निरनिलो धरणीधरः॥ २५ ॥

सुप्रसादः प्रसन्नात्मा विश्वसृग्विश्वभुग्विभुः।
सत्कर्ता सत्कृतस्साधुर्जह्नुर्नारायणो नरः॥ २६ ॥

असङ्ख्येयोऽप्रमेयात्मा विशिष्टश्शिष्टकृच्छुचिः।
सिद्धार्थस्सिद्धसङ्कल्पः सिद्धिदस्सिद्धिसाधनः॥ २७ ॥

वृषाही वृषभो विष्णुः वृषपर्वा वृषोदरः।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः॥ २८ ॥

सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः॥ २९ ॥

ओजस्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः।
ऋद्धस्स्पष्टाक्षरो मन्त्रः चन्द्रांशुर्भास्करद्युतिः॥ ३० ॥

अमृतांशूद्भवो भानुः शशबिन्दुस्सुरेश्वरः।
औषधं जगतस्सेतुः सत्यधर्मपराक्रमः॥ ३१ ॥

भूतभव्यभवन्नाथः पवनः पावनोऽनलः।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः॥ ३२ ॥

युगादिकृद्युगावर्तो नैकमायो महाशनः।
अदृश्यो व्यक्तरूपश्च सहस्रजिदनन्तजित्॥ ३३ ॥

इष्टोऽविशिष्टश्शिष्टेष्टः शिखण्डी नहुषो वृषः।
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः॥ ३४ ॥

अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः।
अपान्निधि रधिष्ठानमप्रमत्तः प्रतिष्ठितः॥ ३५ ॥

स्कन्दस्स्कन्दधरो धुर्यो वरदो वायुवाहनः।
वासुदेवो बृहद्भानुरादिदेवः पुरन्दरः॥ ३६ ॥

अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः॥ ३७ ॥

पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत्।
महर्द्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः॥ ३८ ॥

अतुलः शरभो भीमः समयज्ञो हविर्हरिः।
सर्वलक्षणलक्षण्यो लक्ष्मीवान् समितिञ्जयः॥ ३९ ॥

विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः।
महीधरो महाभागो वेगवानमिताशनः॥ ४० ॥

उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः।
करणं कारणं कर्ता विकर्ता गहनो गुहः॥ ४१॥

व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः।
परर्द्धिः परमस्पष्टः तुष्टः पुष्टः शुभेक्षणः॥ ४२ ॥

रामो विरामो विरतो मार्गो नेयो नयोऽनयः।
वीरश्शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः॥ ४३ ॥

वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणमः पृथुः।
हिरण्यगर्भश्शत्रुघ्नो व्याप्तो वायुरधोक्षजः॥ ४४ ॥

ऋतुस्सुदर्शनः कालः परमेष्ठी परिग्रहः।
उग्रस्संवत्सरो दक्षो विश्रामो विश्वदक्षिणः॥ ४५ ॥

विस्तारः स्थावरस्थाणुः प्रमाणं बीजमव्ययम्।
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः॥ ४६ ॥

अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो महामखः।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामस्समीहनः॥ ४७ ॥

यज्ञ इज्यो महेज्यश्च क्रतुस्सत्रं सताङ्गतिः।
सर्वदर्शी निवृत्तात्मा सर्वज्ञो ज्ञानमुत्तमम्॥ ४८ ॥

सुव्रतः सुमुखस्सूक्ष्मः सुघोषः सुखदः सुहृत्।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः॥ ४९ ॥

स्वापनस्स्ववशो व्यापी नैकात्मा नैककर्मकृत्।
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः॥ ५० ॥

धर्मगुब्धर्मकृद्धर्मी सदक्षरमसत्क्षरम्।
अविज्ञाता सहस्रांशुः विधाता कृतलक्षणः॥ ५१ ॥

गभस्तिनेमिस्सत्त्वस्थस्सिंहो भूतमहेश्वरः।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः॥ ५२ ॥

उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः।
शरीरभूतभृद्भोक्ता कपीन्द्रो भूरिदक्षिणः॥ ५३ ॥

सोमपोऽमृतपः सोमः पुरुजित्पुरुसत्तमः।
विनयो जयः सत्यसन्धो दाशार्हः सात्वतां पतिः॥ ५४॥

जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः।
अम्भोनिधिरनन्तात्मा महोदधिशयोऽन्तकः॥ ५५॥

अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः।
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः॥ ५६॥

महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत्॥ ५७॥

महावराहो गोविन्दः सुषेणः कनकाङ्गदी।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः॥ ५८॥

वेधाः स्वाङ्गोऽजितः कृष्णो दृढः सङ्कर्षणोऽच्युतः।
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः॥ ५९॥

भगवान् भगहा नन्दी वनमाली हलायुधः।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः॥ ६०॥

सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः।
दिविस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः॥ ६१॥

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक्।
सन्न्यासकृच्छमः शान्तो निष्ठा शान्तिः परायणम्॥ ६२॥

शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः॥ ६३॥

अनिवर्ती निवृत्तात्मा सङ्क्षेप्ता क्षेमकृच्छिवः।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः॥ ६४॥

श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः।
श्रीधरः श्रीकरः श्रेयः श्रीमान् लोकत्रयाश्रयः॥ ६५॥

स्वक्षः स्वङ्गः शतानन्दो नन्दिर्ज्योतिर्गणेश्वरः।
विजितात्मा विधेयात्मा सत्कीर्तिश्छिन्नसंशयः॥ ६६ ॥

उदीर्णः सर्वतश्चक्षु रनीशः शाश्वतस्थिरः।
भूशयो भूषणो भूतिरशोकः शोकनाशनः॥ ६७ ॥

अर्चिष्मानर्चितः कुम्भो विशुद्धात्मा विशोधनः।
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः॥ ६८ ॥

कालनेमिनिहा शौरिः शूरः शूरजनेश्वरः।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः॥ ६९ ॥

कामदेवः कामपालः कामी कान्तः कृतागमः।
अनिर्देश्यवपुर्विष्णुः वीरोऽनन्तो धनञ्जयः॥ ७० ॥

ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः॥ ७१ ॥

महाक्रमो महाकर्मा महातेजा महोरगः।
महाक्रतुर्महायज्वा महायज्ञो महाहविः॥ ७२ ॥

स्तव्यः स्तवप्रियः स्तोत्रं स्तुतः स्तोता रणप्रियः।
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः॥ ७३ ॥

मनोजवस्तीर्थकरो वसुरेता वसुप्रदः।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः॥ ७४ ॥

सद्गतिः सत्कृतिः सत्ता सद्भूतिः सत्परायणः।
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः॥ ७५ ॥

भूतावासो वासुदेवः सर्वासुनिलयोऽनलः।
दर्पहा दर्पदोऽदृप्तो दुर्धरोऽथापराजितः॥ ७६ ॥

विश्वमूर्तिर्महामूर्तिः दीप्तमूर्तिरमूर्तिमान्।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः॥ ७७ ॥

एको नैकः सवः कः किं यत्तत्पदमनुत्तमम्।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः॥ ७८ ॥

सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी।
वीरहा विषमः शून्यो घृताशीरचलश्चलः॥ ७९ ॥

अमानी मानदो मान्यो लोकस्वामी त्रिलोकधृत्।
सुमेधा मेधजो धन्यः सत्यमेधा धराधरः॥ ८० ॥

तेजो वृषो द्युतिधरः सर्वशस्त्रभृतां वरः।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः॥ ८१ ॥

चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात्॥ ८२ ॥

समावर्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा॥ ८३ ॥

शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः॥ ८४ ॥

उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः।
अर्को वाजसनिः शृङ्गी जयन्तः सर्वविज्जयी॥ ८५ ॥

सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः।
महाह्रदो महागर्तो महाभूतो महानिधिः॥ ८६ ॥

कुमुदः कुन्दरः कुन्दः पर्जन्यः पवनोऽनिलः।
अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः॥ ८७ ॥

सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः।
न्यग्रोधोदुम्बरोऽश्वत्थः चाणूरान्ध्रनिषूदनः॥ ८८ ॥

सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः॥ ८९ ॥

अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान्।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः॥ ९० ॥

भारभृत्कथितो योगी योगीशः सर्वकामदः।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः॥ ९१ ॥

धनुर्धरो धनुर्वेदो दण्डो दमयिताऽदमः।
अपराजितः सर्वसहो नियन्ता नियमो यमः॥ ९२ ॥

सत्त्ववान् सात्त्विकः सत्यः सत्यधर्मपरायणः।
अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः॥ ९३ ॥

विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः।
रविर्विरोचनः सूर्यः सविता रविलोचनः॥ ९४ ॥

अनन्त हुतभुग्भोक्ता सुखदो नैकदोऽग्रजः।
अनिर्विण्णः सदामर्षी लोकाधिष्ठान मद्भुतः॥ ९५ ॥

सनात्सनातनतमः कपिलः कपिरव्ययः।
स्वस्तिदः स्वस्तिकृत्स्वस्ति स्वस्तिभुक्स्वस्तिदक्षिणः॥ ९६ ॥

अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः॥ ९७ ॥

अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः॥ ९८ ॥

उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः।
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः॥ ९९ ॥

अनन्तरूपोऽनन्तश्रीर्जितमन्युर्भयापहः।
चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः॥ १०० ॥

अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः।
जननो जनजन्मादिः भीमो भीमपराक्रमः॥ १०१ ॥

आधारनिलयो धाता पुष्पहासः प्रजागरः।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः॥ १०२॥

प्रमाणं प्राणनिलयः प्राणधृत्प्राणजीवनः।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः॥ १०३॥

भूर्भुवः स्वस्तरुस्तारः सविता प्रपितामहः।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः॥ १०४॥

यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः।
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च॥ १०५॥

आत्मयोनिः स्वयंजातो वैखानः सामगायनः।
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः॥ १०६॥

शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः॥ १०७॥
श्रीसर्वप्रहरणायुध ओं नम इति॥

वनमाली गदी शार्ङ्गी शङ्खी चक्री च नन्दकी।
श्रीमान् नारायणो विष्णुर्वासुदेवोऽभिरक्षतु॥
श्रीवासुदेवोऽभिरक्षतु ओं नम इति॥

## *॥ फलश्रुतिश्लोकाः॥*

इतीदं कीर्तनीयस्य केशवस्य महात्मनः।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम्॥ १॥

य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत्।
नाशुभं प्राप्नुयात् किञ्चित् सोऽमुत्रेह च मानवः॥ २॥

वेदान्तगो ब्राह्मणः स्यात् क्षत्रियो विजयी भवेत्।
वैश्यो धनसमृद्धः स्याच्छूद्रः सुखमवाप्नुयात्॥ ३॥

धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात्।
कामानवाप्नुयात् कामी प्रजार्थी चाप्नुयात् प्रजाः॥ ४ ॥

भक्तिमान् यः सदोत्थाय शुचिस्तद्गतमानसः।
सहस्रं वासुदेवस्य नाम्नामेतत् प्रकीर्तयेत्॥ ५ ॥

यशः प्राप्नोति विपुलं ज्ञाति प्राधान्यमेव च।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम्॥ ६ ॥

न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति।
भवत्यरोगो द्युतिमान् बलरूपगुणान्वितः॥ ७ ॥

रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात्।
भयान्मुच्येत भीतस्तु मुच्येतापन्न आपदः॥ ८ ॥

दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम्।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः॥ ९ ॥

वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम्॥ १० ॥

न वासुदेवभक्तानामशुभं विद्यते क्वचित्।
जन्ममृत्युजराव्याधिभयं नैवोपजायते॥ ११ ॥

इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः।
युज्येतात्मसुखक्षान्ति श्रीधृतिस्मृतिकीर्तिभिः॥ १२ ॥

न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः।
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे॥ १३ ॥

द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः।
वासुदेवस्य वीर्येण विधृतानि महात्मनः॥ १४ ॥

ससुरासुरगन्धर्वं सयक्षोरगराक्षसम्।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम्॥ १५ ॥

इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः।
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च॥ १६ ॥

सर्वागमानामाचारः प्रथमं परिकल्पितः।
आचारप्रथमो धर्मो धर्मस्य प्रभुरच्युतः॥ १७ ॥

ऋषयः पितरो देवा महाभूतानि धातवः।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम्॥ १८ ॥

योगज्ञानं तथा साङ्ख्यं विद्याः शिल्पादिकर्म च।
वेदाः शास्त्राणि विज्ञानमेतत्सर्वं जनार्दनात्॥ १९ ॥

एको विष्णुर्महद्भूतं पृथग्भूतान्यनेकशः।
त्रीन् लोकान् व्याप्य भूतात्मा भुङ्क्ते विश्वभुगव्ययः॥ २० ॥

इमं स्तवं भगवतो विष्णोर्व्यासेन कीर्तितम्।
पठेद्य इच्छेत् पुरुषः श्रेयः प्राप्तुं सुखानि च॥ २१ ॥

विश्वेश्वरमजं देवं जगतः प्रभवाप्ययम्।
भजन्ति ये पुष्कराक्षं न ते यान्ति पराभवम्॥ २२॥
न ते यान्ति पराभवम् ओं नम इति।

*अर्जुन उवाच* ———
पद्मपत्रविशालाक्ष पद्मनाभ सुरोत्तम।
भक्तानामनुरक्तानां त्राता भव जनार्दन॥ १ ॥

*श्रीभगवानुवाच* ———
यो मां नामसहस्रेण स्तोतुमिच्छति पाण्डव।
सोहऽमेकेन श्लोकेन स्तुत एव न संशयः॥ २॥
स्तुत एव न संशय ओं नम इति॥

*व्यास उवाच* ———
वासनाद्वासुदेवस्य वासितं ते जगत्त्रयम्।

सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते॥ ३॥
श्रीवासुदेव नमोऽस्तु त ओं नम इति॥

*पार्वत्युवाच* ———
केनोपायेन लघुना विष्णोर्नामसहस्रकम्।
पठ्यते पण्डितैर्नित्यं श्रोतुमिच्छाम्यहं प्रभो॥ ४॥

*ईश्वर उवाच* ———
श्रीराम राम रामेति रमे रामे मनोरमे।
सहस्रनामतत्तुल्यं रामनाम वरानने॥ ५॥
श्रीरामनाम वरानन ओं नम इति॥

*ब्रह्मोवाच* ———
नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः॥ ६॥
सहस्रकोटीयुगधारिण ओं नम इति॥

*सञ्जय उवाच* ———
यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम॥ ७॥

*श्रीभगवानुवाच* ———
अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम्॥ ८॥

परित्राणाय साधूनां विनाशाय च दुष्कृताम्।
धर्मसंस्थापनार्थाय संभवामि युगे युगे॥ ९॥

आर्ता विषण्णाः शिथिलाश्च भीताः
    घोरेषु च व्याधिषु वर्तमानाः।
सङ्कीर्त्य नारायणशब्दमात्रं
    विमुक्तदुःखाः सुखिनो भवन्ति॥ १०॥

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्याऽऽत्मना वा प्रकृतेः स्वभावात्।
करोमि यद्यत् सकलं परस्मै
नारायणायेति समर्पयामि॥ ११ ॥

इति श्रीमहाभारते शतसहस्रिकायां संहितायां
वैयासिक्यामानुशासनिकपर्वणि
श्रीभीष्मयुधिष्ठिरसंवादे
श्रीविष्णुसहस्रनामस्तोत्रं सम्पूर्णम्

*śrīḥ*
*śrīmate rāmānujāya namaḥ*

# ॥ *śrīviṣṇusahasranāmastotram* ॥

*śuklāmbaradharaṃ viṣṇuṃ śaśivarṇaṃ caturbhujam*।
*prasannavadanaṃ dhyāyet sarvavighnopaśāntaye*॥ 1 ॥

*yasya dviradavaktrādyāḥ pāriṣadyāḥ paraśśatam*।
*vighnaṃ nighnanti satataṃ viṣvaksenaṃ tamāśraye*॥ 2 ॥

*vyāsaṃ vasiṣṭhanaptāraṃ śakteḥ pautramakalmaṣam*।
*parāśarātmajaṃ vande śukatātaṃ taponidhim*॥ 3 ॥

*vyāsāya viṣṇurūpāya vyāsarūpāya viṣṇave*।
*namo vai brahmanidhaye vāsiṣṭhāya namo namaḥ*॥ 4 ॥

*avikārāya śuddhāya nityāya paramātmane*।
*sadaikarūparūpāya viṣṇave sarvajiṣṇave*॥ 5 ॥

*yasya smaraṇa mātreṇa janmasaṃsārabandhanāt*।
*vimucyate namastasmai viṣṇave prabhaviṣṇave*॥ 6 ॥
*oṃ namo viṣṇave prabhaviṣṇave*॥

*śrīvaiśampāyana uvāca* —
*śrutvā dharmānaśeṣeṇa pāvanāni ca sarvaśaḥ*।
*yudhiṣṭhiraḥ śāntanavaṃ punarevābhyabhāṣata*॥ 1 ॥

*yudhiṣṭhira uvāca* —
*kimekaṃ daivataṃ loke kiṃ vā'pyekaṃ parāyaṇam*।
*stuvantaḥ kaṃ kamarcantaḥ prāpnuyurmānavāḥ śubham*॥ 2 ॥

*ko dharmaḥ sarvadharmāṇāṃ bhavataḥ paramo mataḥ*।
*kiṃ japan mucyate janturjanmasaṃsārabandhanāt*॥ 3 ॥

*śrībhīṣma uvāca —*
*jagatprabhuṃ devadevamanantaṃ puruṣottamam* ।
*stuvannāmasahasreṇa puruṣaḥ satatotthitaḥ* ॥ 4 ॥

*tameva cārcayannityaṃ bhaktyā puruṣamavyayam* ।
*dhyāyan stuvannamasyaṃśca yajamānastameva ca* ॥ 5 ॥

*anādinidhanaṃ viṣṇuṃ sarvalokamaheśvaram* ।
*lokādhyakṣaṃ stuvannityaṃ sarvaduḥkhātigo bhavet* ॥ 6 ॥

*brahmaṇyaṃ sarvadharmajñaṃ lokānāṃ kīrtivardhanam* ।
*lokanāthaṃ mahadbhūtaṃ sarvabhūtabhavodbhavam* ॥ 7 ॥

*eṣa me sarvadharmāṇāṃ dharmo'dhikatamo mataḥ* ।
*yadbhaktyā puṇḍarīkākṣaṃ stavairarcennaraḥ sadā* ॥ 8 ॥

*paramaṃ yo mahattejaḥ paramaṃ yo mahattapaḥ* ।
*paramaṃ yo mahadbrahma paramaṃ yaḥ parāyaṇam* ॥ 9 ॥

*pavitrāṇāṃ pavitraṃ yo maṅgaḻānāṃ ca maṅgaḻam* ।
*daivataṃ devatānāṃ ca bhūtānāṃ yo'vyayaḥ pitā* ॥ 10 ॥

*yataḥ sarvāṇi bhūtāni bhavantyādiyugāgame* ।
*yasmiṃśca pralayaṃ yānti punareva yugakṣaye* ॥ 11 ॥

*tasya lokapradhānasya jagannāthasya bhūpate* ।
*viṣṇornāmasahasraṃ me śṛṇu pāpabhayāpaham* ॥ 12 ॥

*yāni nāmāni gauṇāni vikhyātāni mahātmanaḥ* ।
*ṛṣibhiḥ parigītāni tāni vakṣyāmi bhūtaye* ॥ 13 ॥

*ṛṣirnāmasahasrasya vedavyāso mahā muniḥ* ।
*chando'nuṣṭup tathā devo bhagavān devakīsutaḥ* ॥

*amṛtāṃśūdbhavo bījaṃ śaktirdevakinandanaḥ।*
*trisāmā hṛdayaṃ tasya śāntyarthe viniyujyate॥*

*viṣṇuṃ jiṣṇuṃ mahāviṣṇuṃ prabhaviṣṇuṃ maheśvaram।*
*anekarūpadaityāntaṃ namāmi puruṣottamam॥*

*asya śrīviṣṇordivyasahasranāmastotramahāmantrasya। śrīvedavyāso bhagavān ṛṣiḥ। anuṣṭup chandaḥ। śrīmahāviṣṇuḥ paramātmā śrīmannārāyaṇo devatā। amṛtāṃśūdbhavo bhānuriti bījam। devakīnandanaḥ sraṣṭeti śaktiḥ। udbhavaḥ kṣobhaṇo deva iti paramo mantraḥ। śaṅkhabhṛnnandakī cakrīti kīlakam। śārṅgadhanvā gadādhara ityastram। rathāṅgapāṇirakṣobhya iti netram। trisāmā sāmagaḥ sāmeti kavacam। ānandaṃ parabrahmeti yoniḥ। ṛtuḥ sudarśanaḥ kāla iti digbandhaḥ। śrīviśvarūpa iti dhyānam। śrīmahāviṣṇu prītyarthe śrīsahasranāma jape viniyogaḥ।*

## *dhyānam*

*kṣīrodanvatpradeśe śucimaṇivila-*
*satsaikate mauktikānāṃ*
*mālāklṛptāsanasthaḥ sphaṭikamaṇinibhair-*
*mauktikairmaṇḍitāṅgaḥ।*
*śubhrairabhrai radabhrairupari-*
*viracitairmuktapīyūṣavarṣaiḥ*
*ānandī naḥ punīyādarinalinagadā-*
*śaṅkhapāṇirmukundaḥ॥*

*bhūḥ pādau yasya nābhirviyadasura-*
*nilaścandrasūryau ca netre*
*karṇāvāśāḥ śiro dyaurmukhamapi*
*dahano yasya vāsteyamabdhiḥ।*

*antaḥsthaṃ yasya viśvaṃ suranarakhaga-*
*gobhogigandharvadaityaiḥ*
*citraṃ raṃramyate taṃ tribhuvana-*
*vapuṣaṃ viṣṇumīśaṃ namāmi* ॥

*oṃ namo bhagavate vāsudevāya* ।

*śāntākāraṃ bhujagaśayanaṃ padmanābhaṃ sureśaṃ*
*viśvādhāraṃ gaganasadṛśaṃ meghavarṇaṃ śubhāṅgam* ।
*lakṣmīkāntaṃ kamalanayanaṃ yogihṛddhyānagamyaṃ*
*vande viṣṇuṃ bhavabhayaharaṃ sarvalokaikanātham* ॥

*meghaśyāmaṃ pītakauśeyavāsaṃ*
*śrīvatsāṅkaṃ kaustubhodbhāsitāṅgam* ।
*puṇyopetaṃ puṇḍarīkāyatākṣaṃ*
*viṣṇuṃ vande sarvalokaikanātham* ॥

*namaḥ samastabhūtānāmādibhūtāya bhūbhṛte* ।
*anekarūparūpāya viṣṇave prabhaviṣṇave* ॥

*saśaṅkhacakraṃ sakirīṭakuṇḍalaṃ*
*sapītavastraṃ sarasīruhekṣaṇam* ।
*sahāravakṣaḥsthalaśobhikaustubhaṃ*
*namāmi viṣṇuṃ śirasā caturbhujam* ॥

*chāyāyāṃ pārijātasya hemasiṃhāsanopari* ।
*āsīnamambudaśyāmamāyatākṣamalaṅkṛtam* ॥

*candrānanaṃ caturbāhuṃ śrīvatsāṅkitavakṣasam* ।
*rukmiṇīsatyabhāmābhyāṃ sahitaṃ kṛṣṇamāśraye* ॥

## ॥ *nāmasahasraprārambhaḥ* ॥

*Om̃ viśvaṃ viṣṇurvaṣaṭkāro bhūtabhavyabhavatprabhuḥ* ।
*bhūtakṛd bhūtabhṛdbhāvo bhūtātmā bhūtabhāvanaḥ* ॥ 1 ॥

*pūtātmā paramātmā ca muktānāṃ paramā gatiḥ* ।
*avyayaḥ puruṣaḥ sākṣī kṣetrajño'kṣara eva ca* ॥ 2 ॥

*yogo yogavidāṃ netā pradhānapuruṣeśvaraḥ* ।
*nārasiṃhavapuḥ śrīmān keśavaḥ puruṣottamaḥ* ॥ 3 ॥

*sarvaḥ śarvaḥ śivaḥ sthāṇurbhūtādirnidhiravyayaḥ* ।
*saṃbhavo bhāvano bhartā prabhavaḥ prabhurīśvaraḥ* ॥ 4 ॥

*svayaṃbhūḥ śambhurādityaḥ puṣkarākṣo mahāsvanaḥ* ।
*anādinidhano dhātā vidhātā dhāturuttamaḥ* ॥ 5 ॥

*aprameyo hṛṣīkeśaḥ padmanābho'maraprabhuḥ* ।
*viśvakarmā manustvaṣṭā sthaviṣṭhaḥ sthaviro dhruvaḥ* ॥ 6 ॥

*agrāhyaḥ śāśvataḥ kṛṣṇo lohitākṣaḥ pratardanaḥ* ।
*prabhūta strikakuddhāma pavitraṃ maṅgaḻaṃ param* ॥ 7 ॥

*īśānaḥ prāṇadaḥ prāṇo jyeṣṭhaḥ śreṣṭhaḥ prajāpatiḥ* ।
*hiraṇyagarbho bhūgarbho mādhavo madhusūdanaḥ* ॥ 8 ॥

*īśvaro vikramī dhanvī medhāvī vikramaḥ kramaḥ* ।
*anuttamo durādharṣaḥ kṛtajñaḥ kṛtirātmavān* ॥ 9 ॥

*sureśaḥ śaraṇaṃ śarma viśvaretāḥ prajābhavaḥ* ।
*ahassaṃvatsaro vyāḻaḥ pratyayaḥ sarvadarśanaḥ* ॥ 10 ॥

*ajassarveśvaraḥ siddhaḥ siddhiḥ sarvādiracyutaḥ* ।
*vṛṣākapirameyātmā sarvayogavinissṛtaḥ* ॥ 11 ॥

*vasurvasumanāssatyassamātmā sammitassamaḥ* ।
*amoghaḥ puṇḍarīkākṣo vṛṣakarmā vṛṣākṛtiḥ* ॥ 12 ॥

*rudro bahuśirā babhrurviśvayoniśśuciśravāḥ* ।
*amṛtaśśāśvataḥ sthāṇurvarāroho mahātapāḥ* ॥ 13 ॥

*sarvagaḥ sarvavidbhānuḥ viṣvakseno janārdanaḥ* ।
*vedo vedavidavyaṅgo vedāṅgo vedavitkaviḥ* ॥ 14 ॥

*lokādhyakṣassurādhyakṣo dharmādhyakṣaḥ kṛtākṛtaḥ* ।
*caturātmā caturvyūhaścaturdaṃṣṭraścaturbhujaḥ* ॥ 15 ॥

*bhrājiṣṇurbhojanaṃ bhoktā sahiṣṇurjagadādijaḥ* ।
*anagho vijayo jetā viśvayoniḥ punarvasuḥ* ॥ 16 ॥

*upendro vāmanaḥ prāṃśuḥ amoghaḥ śucirūrjitaḥ* ।
*atīndrassaṅgrahassargo dhṛtātmā niyamo yamaḥ* ॥ 17 ॥

*vedyo vaidyaḥ sadāyogī vīrahā mādhavo madhuḥ* ।
*atīndriyo mahāmāyo mahotsāho mahābalaḥ* ॥ 18 ॥

*mahābuddhirmahāvīryo mahāśaktirmahādyutiḥ* ।
*anirdeśyavapuḥ śrīmān ameyātmā mahādridhṛt* ॥ 19 ॥

*maheṣvāso mahībhartā śrīnivāsassatāṃ gatiḥ* ।
*aniruddhaḥ surānando govindo govidāṃ patiḥ* ॥ 20 ॥

*marīcirdamano haṃsaḥ suparṇo bhujagottamaḥ* ।
*hiraṇyanābhassutapāḥ padmanābhaḥ prajāpatiḥ* ॥ 21 ॥

*amṛtyussarvadṛk siṃhaḥ sandhātā sandhimān sthiraḥ* ।
*ajo durmarṣaṇaśśāstā viśrutātmā surārihā* ॥ 22 ॥

*gururgurutamo dhāma satyassatyaparākramaḥ* ।
*nimiṣo'nimiṣassragvī vācaspatirudāradhīḥ* ॥ 23 ॥

*agraṇīrgrāmaṇīḥ śrīmān nyāyo netā samīraṇaḥ* ।
*sahasramūrdhā viśvātmā sahasrākṣaḥ sahasrapāt* ॥ 24 ॥

*āvartano nivṛttātmā saṃvṛtassaṃpramardanaḥ* ।
*ahassaṃvartako vahniranilo dharaṇīdharaḥ* ॥ 25 ॥

*suprasādaḥ prasannātmā viśvasṛgviśvabhugvibhuḥ* ।
*satkartā satkṛtassādhurjahnurnārāyaṇo naraḥ* ॥ 26 ॥

*asaṅkhyeyo'prameyātmā viśiṣṭaśśiṣṭakṛcchuciḥ* ।
*siddhārthassiddhasaṅkalpaḥ siddhidassiddhisādhanaḥ* ॥ 27 ॥

*vṛṣāhī vṛṣabho viṣṇuḥ vṛṣaparvā vṛṣodaraḥ* ।
*vardhano vardhamānaśca viviktaḥ śrutisāgaraḥ* ॥ 28 ॥

*subhujo durdharo vāgmī mahendro vasudo vasuḥ* ।
*naikarūpo bṛhadrūpaḥ śipiviṣṭaḥ prakāśanaḥ* ॥ 29 ॥

*ojastejo dyutidharaḥ prakāśātmā pratāpanaḥ* ।
*ṛddhasspaṣṭākṣaro mantraḥ candrāṃśurbhāskaradyutiḥ* ॥ 30 ॥

*amṛtāṃśūdbhavo bhānuḥ śaśabindussureśvaraḥ* ।
*auṣadhaṃ jagatassetuḥ satyadharmaparākramaḥ* ॥ 31 ॥

*bhūtabhavyabhavannāthaḥ pavanaḥ pāvano'nalaḥ* ।
*kāmahā kāmakṛtkāntaḥ kāmaḥ kāmapradaḥ prabhuḥ* ॥ 32 ॥

*yugādikṛdyugāvarto naikamāyo mahāśanaḥ* ।
*adṛśyo vyaktarūpaśca sahasrajidanantajit* ॥ 33 ॥

*iṣṭo'viśiṣṭaśśiṣṭeṣṭaḥ śikhaṇḍī nahuṣo vṛṣaḥ* ।
*krodhahā krodhakṛtkartā viśvabāhurmahīdharaḥ* ॥ 34 ॥

*acyutaḥ prathitaḥ prāṇaḥ prāṇado vāsavānujaḥ* ।
*apānnidhi radhiṣṭhānamapramattaḥ pratiṣṭhitaḥ* ॥ 35 ॥

*skandasskandadharo dhuryo varado vāyuvāhanaḥ* ।
*vāsudevo bṛhadbhānurādidevaḥ purandaraḥ* ॥ 36 ॥

*aśokastāraṇastāraḥ śūraḥ śaurirjaneśvaraḥ* ।
*anukūlaḥ śatāvartaḥ padmī padmanibhekṣaṇaḥ* ॥ 37 ॥

*padmanābho'ravindākṣaḥ padmagarbhaḥ śarīrabhṛt* ।
*maharddhirṛddho vṛddhātmā mahākṣo garuḍadhvajaḥ* ॥ 38 ॥

*atulaḥ śarabho bhīmaḥ samayajño havirhariḥ* ।
*sarvalakṣaṇalakṣaṇyo lakṣmīvān samitiñjayaḥ* ॥ 39 ॥

*vikṣaro rohito mārgo heturdāmodaraḥ sahaḥ* ।
*mahīdharo mahābhāgo vegavānamitāśanaḥ* ॥ 40 ॥

*udbhavaḥ kṣobhaṇo devaḥ śrīgarbhaḥ parameśvaraḥ* ।
*karaṇaṃ kāraṇaṃ kartā vikartā gahano guhaḥ* ॥ 41 ॥

*vyavasāyo vyavasthānaḥ saṃsthānaḥ sthānado dhruvaḥ* ।
*parardddhiḥ paramaspaṣṭaḥ tuṣṭaḥ puṣṭaḥ śubhekṣaṇaḥ* ॥ 42 ॥

*rāmo virāmo virato mārgo neyo nayo'nayaḥ* ।
*vīraśśaktimatāṃ śreṣṭho dharmo dharmaviduttamaḥ* ॥ 43 ॥

*vaikuṇṭhaḥ puruṣaḥ prāṇaḥ prāṇadaḥ praṇamaḥ pṛthuḥ* ।
*hiraṇyagarbhaśśatrughno vyāpto vāyuradhokṣajaḥ* ॥ 44 ॥

*ṛtussudarśanaḥ kālaḥ parameṣṭhī parigrahaḥ* ।
*ugrassaṃvatsaro dakṣo viśrāmo viśvadakṣiṇaḥ* ॥ 45 ॥

*vistāraḥ sthāvarasthāṇuḥ pramāṇaṃ bījamavyayam* ।
*artho'nartho mahākośo mahābhogo mahādhanaḥ* ॥ 46 ॥

*anirviṇṇaḥ sthaviṣṭho bhūrdharmayūpo mahāmakhaḥ* ।
*nakṣatranemirnakṣatrī kṣamaḥ kṣāmassamīhanaḥ* ॥ 47 ॥

*yajña ijyo mahejyaśca kratussatraṃ satāṅgatiḥ* ।
*sarvadarśī nivṛttātmā sarvajño jñānamuttamam* ॥ 48 ॥

*suvrataḥ sumukhassūkṣmaḥ sughoṣaḥ sukhadaḥ suhṛt* ।
*manoharo jitakrodho vīrabāhurvidāraṇaḥ* ॥ 49 ॥

*svāpanassvavaśo vyāpī naikātmā naikakarmakṛt* ।
*vatsaro vatsalo vatsī ratnagarbho dhaneśvaraḥ* ॥ 50 ॥

*dharmagubdharmakṛddharmī sadakṣaramasatkṣaram* ।
*avijñātā sahasrāṃśuḥ vidhātā kṛtalakṣaṇaḥ* ॥ 51 ॥

*gabhastinemissattvasthassiṃho bhūtamaheśvaraḥ* ।
*ādidevo mahādevo deveśo devabhṛdguruḥ* ॥ 52 ॥

*uttaro gopatirgoptā jñānagamyaḥ purātanaḥ* ।
*śarīrabhūtabhṛdbhoktā kapīndro bhūridakṣiṇaḥ* ॥ 53 ॥

*somapo'mṛtapaḥ somaḥ purujitpurusattamaḥ* ।
*vinayo jayaḥ satyasandho dāśārhaḥ sātvatāṃ patiḥ* ॥ 54 ॥

*jīvo vinayitā sākṣī mukundo'mitavikramaḥ* ।
*ambhonidhiranantātmā mahodadhiśayo'ntakaḥ* ॥ 55 ॥

*ajo mahārhaḥ svābhāvyo jitāmitraḥ pramodanaḥ* ।
*ānando nandano nandaḥ satyadharmā trivikramaḥ* ॥ 56 ॥

*maharṣiḥ kapilācāryaḥ kṛtajño medinīpatiḥ* ।
*tripadastridaśādhyakṣo mahāśṛṅgaḥ kṛtāntakṛt* ॥ 57 ॥

*mahāvarāho govindaḥ suṣeṇaḥ kanakāṅgadī* ।
*guhyo gabhīro gahano guptaścakragadādharaḥ* ॥ 58 ॥

*vedhāḥ svāṅgo'jitaḥ kṛṣṇo dṛḍhaḥ saṅkarṣaṇo'cyutaḥ* ।
*varuṇo vāruṇo vṛkṣaḥ puṣkarākṣo mahāmanāḥ* ॥ 59 ॥

*bhagavān bhagahā nandī vanamālī halāyudhaḥ* ।
*ādityo jyotirādityaḥ sahiṣṇurgatisattamaḥ* ॥ 60 ॥

*sudhanvā khaṇḍaparaśurdāruṇo draviṇapradaḥ* ।
*divispṛksarvadṛgvyāso vācaspatirayonijaḥ* ॥ 61 ॥

*trisāmā sāmagaḥ sāma nirvāṇaṃ bheṣajaṃ bhiṣak* ।
*sannyāsakṛcchamaḥ śānto niṣṭhā śāntiḥ parāyaṇam* ॥ 62 ॥

*śubhāṅgaḥ śāntidaḥ sraṣṭā kumudaḥ kuvaleśayaḥ* ।
*gohito gopatirgoptā vṛṣabhākṣo vṛṣapriyaḥ* ॥ 63 ॥

*anivartī nivṛttātmā saṅkṣeptā kṣemakṛcchivaḥ* ।
*śrīvatsavakṣāḥ śrīvāsaḥ śrīpatiḥ śrīmatāṃ varaḥ* ॥ 64 ॥

*śrīdaḥ śrīśaḥ śrīnivāsaḥ śrīnidhiḥ śrīvibhāvanaḥ* ।
*śrīdharaḥ śrīkaraḥ śreyaḥ śrīmān lokatrayāśrayaḥ* ॥ 65 ॥

*svakṣaḥ svaṅgaḥ śatānando nandirjyotirgaṇeśvaraḥ* ।
*vijitātmā vidheyātmā satkīrtiśchinnasaṃśayaḥ* ॥ 66 ॥

*udīrṇaḥ sarvataścakṣu ranīśaḥ śāśvatasthiraḥ* ।
*bhūśayo bhūṣaṇo bhūtiraśokaḥ śokanāśanaḥ* ॥ 67 ॥

*arciṣmānarcitaḥ kumbho viśuddhātmā viśodhanaḥ* ।
*aniruddho'pratirathaḥ pradyumno'mitavikramaḥ* ॥ 68 ॥

*kālaneminihā śauriḥ śūraḥ śūrajaneśvaraḥ* ।
*trilokātmā trilokeśaḥ keśavaḥ keśihā hariḥ* ॥ 69 ॥

*kāmadevaḥ kāmapālaḥ kāmī kāntaḥ kṛtāgamaḥ* ।
*anirdeśyavapurviṣṇuḥ vīro'nanto dhanañjayaḥ* ॥ 70 ॥

*brahmaṇyo brahmakṛdbrahmā brahma brahmavivardhanaḥ* ।
*brahmavidbrāhmaṇo brahmī brahmajño brāhmaṇapriyaḥ* ॥ 71 ॥

*mahākramo mahākarmā mahātejā mahoragaḥ* ।
*mahākraturmahāyajvā mahāyajño mahāhaviḥ* ॥ 72 ॥

*stavyaḥ stavapriyaḥ stotraṃ stutaḥ stotā raṇapriyaḥ* ।
*pūrṇaḥ pūrayitā puṇyaḥ puṇyakīrtiranāmayaḥ* ॥ 73 ॥

*manojavastīrthakaro vasuretā vasupradaḥ* ।
*vasuprado vāsudevo vasurvasumanā haviḥ* ॥ 74 ॥

*sadgatiḥ satkṛtiḥ sattā sadbhūtiḥ satparāyaṇaḥ* ।
*śūraseno yaduśreṣṭhaḥ sannivāsaḥ suyāmunaḥ* ॥ 75 ॥

*bhūtāvāso vāsudevaḥ sarvāsunilayo'nalaḥ* ।
*darpahā darpado'dṛpto durdharo'thāparājitaḥ* ॥ 76 ॥

*viśvamūrtirmahāmūrtiḥ dīptamūrtiramūrtimān* ।
*anekamūrtiravyaktaḥ śatamūrtiḥ śatānanaḥ* ॥ 77 ॥

*eko naikaḥ savaḥ kaḥ kiṃ yattatpadamanuttamam* |
*lokabandhurlokanātho mādhavo bhaktavatsalaḥ* || 78 ||

*suvarṇavarṇo hemāṅgo varāṅgaścandanāṅgadī* |
*vīrahā viṣamaḥ śūnyo ghṛtāśīracalaścalaḥ* || 79 ||

*amānī mānado mānyo lokasvāmī trilokadhṛt* |
*sumedhā medhajo dhanyaḥ satyamedhā dharādharaḥ* || 80 ||

*tejo vṛṣo dyutidharaḥ sarvaśastrabhṛtāṃ varaḥ* |
*pragraho nigraho vyagro naikaśṛṅgo gadāgrajaḥ* || 81 ||

*caturmūrtiścaturbāhuścaturvyūhaścaturgatiḥ* |
*caturātmā caturbhāvaścaturvedavidekapāt* || 82 ||

*samāvarto nivṛttātmā durjayo duratikramaḥ* |
*durlabho durgamo durgo durāvāso durārihā* || 83 ||

*śubhāṅgo lokasāraṅgaḥ sutantustantuvardhanaḥ* |
*indrakarmā mahākarmā kṛtakarmā kṛtāgamaḥ* || 84 ||

*udbhavaḥ sundaraḥ sundo ratnanābhaḥ sulocanaḥ* |
*arko vājasaniḥ śṛṅgī jayantaḥ sarvavijjayī* || 85 ||

*suvarṇabindurakṣobhyaḥ sarvavāgīśvareśvaraḥ* |
*mahāhṛdo mahāgarto mahābhūto mahānidhiḥ* || 86 ||

*kumudaḥ kundaraḥ kundaḥ parjanyaḥ pavano'nilaḥ* |
*amṛtāśo'mṛtavapuḥ sarvajñaḥ sarvatomukhaḥ* || 87 ||

*sulabhaḥ suvrataḥ siddhaḥ śatrujicchatrutāpanaḥ* |
*nyagrodhodumbaro'śvatthaḥ cāṇūrāndhraniṣūdanaḥ* || 88 ||

*sahasrārciḥ saptajihvaḥ saptaidhāḥ saptavāhanaḥ* ।
*amūrtiranagho'cintyo bhayakṛdbhayanāśanaḥ* ॥ 89 ॥

*aṇurbṛhatkṛśaḥ sthūlo guṇabhṛnnirguṇo mahān* ।
*adhṛtaḥ svadhṛtaḥ svāsyaḥ prāgvaṃśo vaṃśavardhanaḥ* ॥ 90 ॥

*bhārabhṛtkathito yogī yogīśaḥ sarvakāmadaḥ* ।
*āśramaḥ śramaṇaḥ kṣāmaḥ suparṇo vāyuvāhanaḥ* ॥ 91 ॥

*dhanurdharo dhanurvedo daṇḍo damayitā'damaḥ* ।
*aparājitaḥ sarvasaho niyantā niyamo yamaḥ* ॥ 92 ॥

*sattvavān sāttvikaḥ satyaḥ satyadharmaparāyaṇaḥ* ।
*abhiprāyaḥ priyārho'rhaḥ priyakṛtprītivardhanaḥ* ॥ 93 ॥

*vihāyasagatirjyotiḥ surucirhutabhugvibhuḥ* ।
*ravirvirocanaḥ sūryaḥ savitā ravilocanaḥ* ॥ 94 ॥

*ananta hutabhugbhoktā sukhado naikado'grajaḥ* ।
*anirviṇṇaḥ sadāmarṣī lokādhiṣṭhāna madbhutaḥ* ॥ 95 ॥

*sanātsanātanatamaḥ kapilaḥ kapiravyayaḥ* ।
*svastidaḥ svastikṛtsvasti svastibhuksvastidakṣiṇaḥ* ॥ 96 ॥

*araudraḥ kuṇḍalī cakrī vikramyūrjitaśāsanaḥ* ।
*śabdātigaḥ śabdasahaḥ śiśiraḥ śarvarīkaraḥ* ॥ 97 ॥

*akrūraḥ peśalo dakṣo dakṣiṇaḥ kṣamiṇāṃ varaḥ* ।
*vidvattamo vītabhayaḥ puṇyaśravaṇakīrtanaḥ* ॥ 98 ॥

*uttāraṇo duṣkṛtihā puṇyo duḥsvapnanāśanaḥ* ।
*vīrahā rakṣaṇaḥ santo jīvanaḥ paryavasthitaḥ* ॥ 99 ॥

*anantarūpo'nantaśrīrjitamanyurbhayāpahaḥ* ।
*caturasro gabhīrātmā vidiśo vyādiśo diśaḥ* ॥ 100 ॥

*anādirbhūrbhuvo lakṣmīḥ suvīro rucirāṅgadaḥ* ।
*janano janajanmādiḥ bhīmo bhīmaparākramaḥ* ॥ 101 ॥

*ādhāranilayo dhātā puṣpahāsaḥ prajāgaraḥ* ।
*ūrdhvagaḥ satpathācāraḥ prāṇadaḥ praṇavaḥ paṇaḥ* ॥ 102 ॥

*pramāṇaṃ prāṇanilayaḥ prāṇadhṛtprāṇajīvanaḥ* ।
*tattvaṃ tattvavidekātmā janmamṛtyujarātigaḥ* ॥ 103 ॥

*bhūrbhuvaḥ svastarustāraḥ savitā prapitāmahaḥ* ।
*yajño yajñapatiryajvā yajñāṅgo yajñavāhanaḥ* ॥ 104 ॥

*yajñabhṛdyajñakṛdyajñī yajñabhugyajñasādhanaḥ* ।
*yajñāntakṛdyajñaguhyamannamannāda eva ca* ॥ 105 ॥

*ātmayoniḥ svayaṃjāto vaikhānaḥ sāmagāyanaḥ* ।
*devakīnandanaḥ sraṣṭā kṣitīśaḥ pāpanāśanaḥ* ॥ 106 ॥

*śaṅkhabhṛnnandakī cakrī śārṅgadhanvā gadādharaḥ* ।
*rathāṅgapāṇirakṣobhyaḥ sarvapraharaṇāyudhaḥ* ॥ 107 ॥
*śrīsarvapraharaṇāyudha oṃ nama iti* ॥

*vanamālī gadī śārṅgī śaṅkhī cakrī ca nandakī* ।
*śrīmān nārāyaṇo viṣṇurvāsudevo'bhirakṣatu* ॥
*śrīvāsudevo'bhirakṣatu oṃ nama iti* ॥

## ‖ *phalaśrutiślokāḥ* ‖

*itīdaṃ kīrtanīyasya keśavasya mahātmanaḥ* |
*nāmnāṃ sahasraṃ divyānāmaśeṣeṇa prakīrtitam* ‖ 1 ‖

*ya idaṃ śṛṇuyānnityaṃ yaścāpi parikīrtayet* |
*nāśubhaṃ prāpnuyāt kiñcit so'mutreha ca mānavaḥ* ‖ 2 ‖

*vedāntago brāhmaṇaḥ syāt kṣatriyo vijayī bhavet* |
*vaiśyo dhanasamṛddhaḥ syācchūdraḥ sukhamavāpnuyāt* ‖ 3 ‖

*dharmārthī prāpnuyāddharmamarthārthī cārthamāpnuyāt* |
*kāmānavāpnuyāt kāmī prajārthī cāpnuyāt prajāḥ* ‖ 4 ‖

*bhaktimān yaḥ sadotthāya śucistadgatamānasaḥ* |
*sahasraṃ vāsudevasya nāmnāmetat prakīrtayet* ‖ 5 ‖

*yaśaḥ prāpnoti vipulaṃ jñāti prādhānyameva ca* |
*acalāṃ śriyamāpnoti śreyaḥ prāpnotyanuttamam* ‖ 6 ‖

*na bhayaṃ kvacidāpnoti vīryaṃ tejaśca vindati* |
*bhavatyarogo dyutimān balarūpaguṇānvitaḥ* ‖ 7 ‖

*rogārto mucyate rogādbaddho mucyeta bandhanāt* |
*bhayānmucyeta bhītastu mucyetāpanna āpadaḥ* ‖ 8 ‖

*durgāṇyatitaratyāśu puruṣaḥ puruṣottamam* |
*stuvannāmasahasreṇa nityaṃ bhaktisamanvitaḥ* ‖ 9 ‖

*vāsudevāśrayo martyo vāsudevaparāyaṇaḥ* |
*sarvapāpaviśuddhātmā yāti brahma sanātanam* ‖ 10 ‖

*na vāsudevabhaktānāmaśubhaṃ vidyate kvacit* |
*janmamṛtyujarāvyādhibhayaṃ naivopajāyate* ‖ 11 ‖

*imaṃ stavamadhīyānaḥ śraddhābhaktisamanvitaḥ* ।
*yujyetātmasukhakṣānti śrīdhṛtismṛtikīrtibhiḥ* ॥ 12 ॥

*na krodho na ca mātsaryaṃ na lobho nāśubhā matiḥ* ।
*bhavanti kṛtapuṇyānāṃ bhaktānāṃ puruṣottame* ॥ 13 ॥

*dyauḥ sacandrārkanakṣatrā khaṃ diśo bhūrmahodadhiḥ* ।
*vāsudevasya vīryeṇa vidhṛtāni mahātmanaḥ* ॥ 14 ॥

*sasurāsuragandharvaṃ sayakṣoragarākṣasam* ।
*jagadvaśe vartatedaṃ kṛṣṇasya sacarācaram* ॥ 15 ॥

*indriyāṇi mano buddhiḥ sattvaṃ tejo balaṃ dhṛtiḥ* ।
*vāsudevātmakānyāhuḥ kṣetraṃ kṣetrajña eva ca* ॥ 16 ॥

*sarvāgamānāmācāraḥ prathamaṃ parikalpitaḥ* ।
*ācāraprathamo dharmo dharmasya prabhuracyutaḥ* ॥ 17 ॥

*ṛṣayaḥ pitaro devā mahābhūtāni dhātavaḥ* ।
*jaṅgamājaṅgamaṃ cedaṃ jagannārāyaṇodbhavam* ॥ 18 ॥

*yogajñānaṃ tathā sāṅkhyaṃ vidyāḥ śilpādikarma ca* ।
*vedāḥ śāstrāṇi vijñānametatsarvaṃ janārdanāt* ॥ 19 ॥

*eko viṣṇurmahadbhūtaṃ pṛthagbhūtānyanekaśaḥ* ।
*trīn lokān vyāpya bhūtātmā bhuṅkte viśvabhugavyayaḥ* ॥ 20 ॥

*imaṃ stavaṃ bhagavato viṣṇorvyāsena kīrtitam* ।
*paṭhedya icchet puruṣaḥ śreyaḥ prāptuṃ sukhāni ca* ॥ 21 ॥

*viśveśvaramajaṃ devaṃ jagataḥ prabhavāpyayam* ।
*bhajanti ye puṣkarākṣaṃ na te yānti parābhavam* ॥ 22 ॥
*na te yānti parābhavam oṃ nama iti* ।

*arjuna uvāca —*
*padmapatraviśālākṣa padmanābha surottama* ।
*bhaktānāmanuraktānāṃ trātā bhava janārdana* ॥ 1 ॥

*śrībhagavānuvāca —*
*yo māṃ nāmasahasreṇa stotumicchati pāṇḍava* ।
*soha'mekena ślokena stuta eva na saṃśayaḥ* ॥ 2 ॥
*stuta eva na saṃśaya oṃ nama iti* ॥

*vyāsa uvāca —*
*vāsanādvāsudevasya vāsitaṃ te jagattrayam* ।
*sarvabhūtanivāso'si vāsudeva namo'stu te* ॥ 3 ॥
*śrīvāsudeva namo'stu ta oṃ nama iti* ॥

*pārvatyuvāca —*
*kenopāyena laghunā viṣṇornāmasahasrakam* ।
*paṭhyate paṇḍitairnityaṃ śrotumicchāmyahaṃ prabho* ॥ 4 ॥

*īśvara uvāca —*
*śrīrāma rāma rāmeti rame rāme manorame* ।
*sahasranāmatattulyaṃ rāmanāma varānane* ॥ 5 ॥
*śrīrāmanāma varānana oṃ nama iti* ॥

*brahmovāca —*
*namo'stvanantāya sahasramūrtaye*
*sahasrapādākṣiśirorubāhave* ।
*sahasranāmne puruṣāya śāśvate*
*sahasrakoṭīyugadhāriṇe namaḥ* ॥ 6 ॥
*sahasrakoṭīyugadhāriṇa oṃ nama iti* ॥

*sañjaya uvāca —*
*yatra yogeśvaraḥ kṛṣṇo yatra pārtho dhanurdharaḥ* ।
*tatra śrīrvijayo bhūtirdhruvā nītirmatirmama* ॥ 7 ॥

*śrībhagavānuvāca —*
*ananyāścintayanto māṃ ye janāḥ paryupāsate* ।
*teṣāṃ nityābhiyuktānāṃ yogakṣemaṃ vahāmyaham* ॥ 8 ॥

*paritrāṇāya sādhūnāṃ vināśāya ca duṣkṛtām* ।
*dharmasaṃsthāpanārthāya saṃbhavāmi yuge yuge* ॥ 9 ॥

*ārtā viṣaṇṇāḥ śithilāśca bhītāḥ*
*ghoreṣu ca vyādhiṣu vartamānāḥ* ।
*saṅkīrtya nārāyaṇaśabdamātraṃ*
*vimuktaduḥkhāḥ sukhino bhavanti* ॥ 10 ॥

*kāyena vācā manasendriyairvā*
*buddhyā''tmanā vā prakṛteḥ svabhāvāt* ।
*karomi yadyat sakalaṃ parasmai*
*nārāyaṇāyeti samarpayāmi* ॥ 11 ॥

*iti śrīmahābhārate śatasahasrikāyāṃ saṃhitāyāṃ*
*vaiyāsikyāmānuśāsanikaparvaṇi*
*śrībhīṣmayudhiṣṭhirasaṃvāde*
*śrīviṣṇusahasranāmastotraṃ sampūrṇam*